६२६५

Shri Raghunatha Temple MSS. Library,
JAMMU

No. २८ ग-१ E-6

Title श्रीमहालक्ष्मीपूजनम्

Author

Extent ६ पत्र Age सं. ....

Subject धर्मशास्त्र

© Dharmarth Trust. Digitized By eGangotri

सं. २६ग-६
श्रीमहालक्ष्मीपूजनम्

सं० २६

श्री महालक्ष्मी पूजा

© Dharmarth Trust. Digitized By eGangotri

नमः

ल॰ पू॰ ॐ श्रीगणेशाय नमः ॐ अथ श्री
१ महालक्ष्मीपूजनप्रारम्भः ॐ म
हालक्ष्म्यै नमः इति मंत्रेण ना
मकार्य्यं ॐ महालक्ष्म्यान्नम
लक्ष्मीपिंडिकां कांचनं तथा वर्त्त
येत इति पूजनानन्तरं लक्ष्मीस्तो
त्रं पठित्वा लक्ष्मीं प्रार्थयेत्
नमस्ते सर्वदेवानां वरदासि हरि
प्रिये या गतिस्त्वत्प्रपन्नानां सा
मे स्यात्त्वदर्चनात् तथा चा
त्रैव कुबेरस्यापि पूजा विधेया।
तयोः पूजामंत्रौ ऐरावतसमा
रूढो वज्रहस्तो महाबलः शत
यज्ञाधिपो देवस्तस्मात् इन्द्राय
ते नमः इति कुबेरस्य पूजायां
धनदाय नमस्तुभ्यं निधिपद्मा
धिपाय च भवंतु त्वत्प्रसादेन ध
नधान्यादिसंपद इति अथ ल
क्ष्मीपूजाप्रयोगः देशकालौ सं
कीर्त्य अस्यां दीपावल्याममावा।

© Dharmarth Trust. Digitized By eGangotri

स्यायां मम ऽलक्ष्मीनिवृत्तिपू
र्वकस्थिरलक्ष्मीसर्वसौख्यसौ
भाग्यावाप्तयेसर्वांगसंपन्नलक्ष्मी
पूजनंकरिष्ये इतिसंकल्पंविधा
य स्वस्त्ययनपूर्वकंगणपतिपू
जनंविधाय लक्ष्मींपूजयेत् या
श्रीः पद्मासनस्थाविपुलकटि
तटीपद्मपत्रायताक्षी गंभीरा
वर्तनाभिस्तनभरनमिता शुभ्र
वस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्गजेन्द्रै
र्मणिगणखचितैः स्नापिता
हेमकुंभैः नित्यंसापद्महस्ता
ममवसतुगृहेसर्वमांगल्य
युक्ता इतिध्यानं ॐ भूर्भुव
स्वर्लक्ष्मीइहागच्छइहतिष्ठ
महालक्ष्मिसमागच्छपद्मना
भगृहादिह नानोपचारपू
जेयंत्वदर्थंपरिकल्पिता
इत्यावाहनं एह्येहिविश्व
जननिकमलेकमलालये

© Dharmarth Trust. Digitized By eGangotri

ल० पू० कमलेस्मिंस्थित्वादेविसदात्वं
२ कृपयाकुरु इत्यासनं गंगादि
दिसलिलाधारंतामपंत्राभिमं
त्रितं दूरयात्राश्रमहरंपाद्यं
मे प्रतिगृह्यतां इतिपाद्यं र
त्नाकरसमुद्भूते रत्नभूषणि
भूषिते तीर्थानामधिपेत्वं
हि गृहाणार्घ्यं नमोस्तुते इत्यर्घ्यं
शीतलोजलमानीतं कर्पूरैलासुगं
धितं एतदाचमनीयार्थसलि
लं प्रतिगृह्यतां इत्याचमनं स्ना
नं तव महालक्ष्मि कर्पूरागुरुवासि
तं सर्वतीर्थेभ्यः समानीतं स्नानंत
त्प्रतिगृह्यतां इतिस्नानं तंतुसंता
नसंबद्धं कलाकौशल्यनिर्मितं
सर्वांगाभरणश्रेष्ठं वसनं परिगृ
ह्यतां इति वस्त्रं मलयाचलसं
भूतं नानापन्नगसेवितं शीतलं
बहुलामोदं चंदनं प्रतिगृह्यतां
इति गंधं अक्षतानरविंदादि

© Dharmarth Trust. Digitized By eGangotri

नद्वत्रेशसहोदरे मात्तीकपद्मान्व
ह्वाद्विगृहाणार्घ्यं मयार्पितान्
इत्यर्घ्यत्तं मिलत्सुरि मलामोद
मत्तालिकुलसंकुलं नंदनोद्यान
संभूतं पद्मायैकुसुमं नमः इति
पुष्पं गंधसंभारसंनद्धं दृष्णुव
त्सुसमुद्भव सुरासुरनरादिहृ नं=
वोयं प्रतिगृह्यतां इति धूपं मार्त्त
डमंडलाकारं चंद्रबिंबाग्नितेजसं
निधानं देवि दीपोयं निर्मितस्त
वभक्तितः इति दीपं देवताल
यपात्रालंकृतलाधारसंभवं षो
डशाकारसंभारं नैवेद्यं तेभ्यि ध्या
येनमः इति नैवेद्यं स्नानादि
कं विधायाचियत्नः सिद्धिरवाप्य
ते एतदाचमनं दत्तं महालक्ष्मी
प्रतिगृह्यतां इति पुनराचमनं
पात्रालंकृतसंभृतवदनांभोज
भूषणं नानागुणसमाकीर्णतां
बूलं देवितेनमः इतितांबूलं

© Dharmarth Trust. Digitized By eGangotri

ल॰ पृ॰ नारिकेलंसनारंगंकदलीमातु
३ लिंगकं देशकालोद्भवेपमेग्र
हाणफलमुत्तमं इतिफलं
स्वर्णाब्दपद्मे जेसमर्पितं
मिदंवस्त्र यथाशक्त्याग्रह
णात्वमनंतफलप्रदये इ
तिदक्षिणाद्रव्यं अथांग
पूजा अचलायैनमः पादौ
पूजयामि चंचलायैनमः
जानुनीपूजयामि कमला
यैनमः कटिंपूजयामि
हरिवल्लभायैनमः उदरं
पूजयामि ललितायैनमः
भुजौपूजयामि कमला
यैनमः हृदयंपूजयामि
उत्कंठिन्यैनमः कंठंपूजा
यामि अमलायैनमः मु
खंपूजयामि श्रियैनमः
शिरःपूजयामि रमायैन
मः सर्वांगंपूजयामि न

© Dharmarth Trust. Digitized By eGangotri

तः कुबेरपूजा ॐ भूर्भुवः स्वः
कुबेर इहागच्छ । इति कुबेर
मावाह्य कुबेराय नमः इ
ति मंत्रेण पाद्यादिभिर्दवि
रागान्संपूज्य प्रार्थना कुबे
राय नमस्तुभ्यं निधिपद्माधिपाय
च भवन्तु त्वत्प्रसादेन धनधान्या
दि संपदः ततोऽगस्त्यपूजा
ॐ भूर्भुवः स्वः अगस्त्य इहागच्छ ।
अगस्त्याय नमः इति पाद्या
दिभिर्दविरागान्संपूज्य प्रार्थ
ना काशपुष्पप्रतीकाशव
ह्निमारुतसंभव मित्रावरुण
योः पुत्रः कुम्भयोने नमोऽस्तुते
अथेन्द्रपूजनं ॐ भूर्भुवः स्वः
इन्द्र इहागच्छ । इत्यावाह्य
ॐ इन्द्राय नमः इति पाद्यादि
भिः संपूज्य प्रार्थनां कुर्या
त् विचित्रैरावतस्थाय पौलो
म्यालिंगिताय च भक्तवत्सा
ले

© Dharmarth Trust. Digitized By eGangotri

ल० सू०
४

हिरण्यकल्पाय सहस्रदायने नमः
इति संपूज्य श्रीसूक्तपाठं कुर्या
त् ॥ ओं हिरण्यवर्णां हरिणीं सुव
र्णरजतस्रजां । चन्द्रां हिरण्मयीं ल
क्ष्मीं जातवेदो मम आवह ॥ १ ॥ तां म आ
वह जातवेदो लक्ष्मीमनपगामिनी
म् । यस्यां हिरण्यं विन्देयं गामश्व
ं पुरुषानहम् ॥ २ ॥ अश्वपूर्वां र
थमध्यां हस्तिनादप्रमोदिनीं
श्रियं देवीमुपह्वये श्रीर्मा दे
वी जुषताम् ॥ ३ ॥ कांसोस्मितां हिर
ण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां
तर्पयन्तीं । पद्मे स्थितां पद्मव
र्णां तामिहोपह्वये श्रियं ॥ ४ ॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रि
यं लोके देवजुष्टामुदारां । तां पद्मि
नीमीं शरणमहं प्रपद्ये अलक्ष्मी
र्मे नश्यतां त्वां वृणे ॥ ५ ॥ आदि
त्यवर्णे तपसोधिजातो वनस्प
तिस्तव वृक्षोथ बिल्वः । तस्य

© Dharmarth Trust. Digitized By eGangotri

फलानितपसानुदन्तुमायान्तराश्चबा
ह्याअलक्ष्मीः ६ उपैतुमांदेव
सखःकीर्तिश्चमणिनासह प्रा
दुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिवृद्धिं
ददातुमे ७ क्षुत्पिपासामला
ज्येष्ठामलक्ष्मींनाशयाम्यहं
अभूतिमसमृद्धिंचसर्वांनिर्णुद
मेगृहात् ८ गंधद्वारांदुराध
र्षांनित्यपुष्टांकरीषिणीं ई
श्वरींसर्वभूतानांतामिहोपह्व
येश्रियं ९ मनसःकाममाकू
तिंवाचःसत्यमशीमहि पशू
नांरूपमन्नस्यमयिश्रीःश्रय
तांयशः १० कर्दमेनप्रजाभू
तामयिसंभवकर्दमः श्रियं
वासयमेकुलेमातरंपद्ममालि
नीं ११ आपःसृजन्तुस्नि
ग्धानिचिक्लीतवसमेगृहे
निचदेवींमातरंश्रियंवा
सयमेकुले १२ आर्द्रांपुष्क

© Dharmarth Trust. Digitized By eGangotri

ल·पृ· रिणींपुष्टिंसुवर्णांहिममालिं
५ नीं सूर्यांहिरण्मयींलक्ष्मींजा
तवेदोममावह १३ आर्द्रांयःक
रिणींयष्टिंपिंगलांपद्ममालि
नीं चंद्रांहिरण्मयींलक्ष्मींजा
तवेदोममावह १४ तांमआ
वहजातवेदोलक्ष्मीमनपगा
मिनीं यस्यांहिरण्यंप्रभूतं
गावोदास्योऽश्वान्विंदेयंपुरु
षानहं १५ इतिश्रीसूक्तंप
ठित्वा पुष्पांजलिंसमर्पये
त् ततोनीराजनं कुर्यात्सु
सिद्धार्त्नप्रभानीराकेनकर्मे
नवसौभाग्यसंसिद्ध्यैकर
वेनीराजनंरमे इतिनीराज
नं दत्वापादौनीराजकरत्वबभ
क्तानांवरप्रदे करोमितेसदा
भक्त्यावत्स श्रीनप्रदक्षिणां
इतिप्रदक्षिणांकृत्वा प्राणा
यामकुर्यात् ततः सर्वत्रदीपान्

© Dharmarth Trust. Digitized By eGangotri

ज्वाल्य दीपवृक्षास्तप्यादेयाश्च
त्याद्देवगृहेषु च गोष्ठरोद्यान
चैत्येषु च दीपवृक्षनिवेषमस्तु च
त्वमूलेषु गोष्ठेषु चत्वरेषु गृहे
षु च मंडुराकारिशालायां कु
र्यात्क्रयस्त्रामिषु वस्त्रेषु ध्येर्च
विन्यस्या: क्रयविक्रयपण्यसिका
सर्वत्र दीपदानं नमः अग्निर्ज्यो" मंत्रः:-
तीरविर्ज्योतिश्चंद्रो ज्योतिस्त
थैवच उत्तमोज्योतिषांज्योः
तिर्दीपज्योतिर्नमोस्तुते एवंदी
पदानंकृत्वा महालक्ष्मीप्रार्थ
येत् नमस्ते सर्वलोकानांवर
दासि हरिप्रिये यागतिस्त्वत्प्र
पन्नानांसामेभूयात्त्वदर्चना
त् यालक्ष्मीर्दिवसेपरावेदु
पावल्याचमस्तले गवांगोष्ठे
षु कार्तिक्यांपसालक्ष्मीर्वरदा
मम इतिवारत्रयंपठित्वा या
मापश्चात्सन्नस्थ्याविठलकाटित

© Dharmarth Trust. Digitized By eGangotri

ल· पृ· दीपद्मपत्रायताक्षीगंभीराव
६ र्त्तनाभिस्तनभरनमिताशुभ्र
वस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्ग
जेंद्रैर्मणिगणखचितैः स्ना
6 पिताहेमकुंभैर्नित्यंसापद्मह
स्तामम वसतुगृहेदिव्यमांग
ल्ययुक्ता सर्वमंगलमांगल्ये
शिवे सर्वार्थसाधिके शर
ण्ये त्र्यंबके गौरि नारायणि
नमोस्तुते । श्रप्यविद्यास्त्रिः
रूपंदेहिजयंदेहिभाग्यंभवति
देहिमे पुत्रान्देहिधनंदेहिस
र्वान्कामांश्चदेहिमे ॥ ॥ ॥
इतिमहालक्ष्मीपूजनंसमाप्तं

© Dharmarth Trust. Digitized By eGangotri

© Dharmarth Trust. Digitized By eGangotri